# Anekavishayamuktakashlokah

# અનેકવિષયમુક્તકશ્લોકાઃ

## Document Information

Text title : Anekavishaya Muktaka Shlokah

File name : anekaviShayamuktakashlokAH.itx

Category : misc

Location : doc_z_misc_general

Proofread by : Aruna Narayanan narayanan.aruna at gmail.com

Description/comments : Ramanuja Stotramala

Latest update : November 23, 2019, July 5, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 5, 2021

*sanskritdocuments.org*

# અનેકવિષયમુક્તકશ્લોકાઃ

અનેકપૂર્વાચાર્યૈરનુગૃહીતાઃ
શ્રીરસ્તુ ।
શ્રીમતે હયગ્રીવાય નમઃ ।
શ્રીમતે રામાનુજાય નમઃ ॥

યસ્ય પ્રસાદકલયા બધિરઃ શ઼ૃણોતિ
    પઙ્ગુઃ પ્રધાવતિ જવેન ચ વક્તિ મૂકઃ ।
અન્ધઃ પ્રપશ્યતિ સુતં લભતે ચ વન્ધ્યા
    તં દેવમેવ વરદં શરણં ગતોઽસ્મિ ॥ ૧॥

આશૈલાદદ્રિકન્યાચરણકિસલયન્યાસધન્યોપકણ્ઠાત્
    આરક્ષોનીતસીતામુખકમલસમુલ્લાસહેતોશ્ચ સેતોઃ ।
આ ચ પ્રાચ્યપ્રતીચ્યક્ષિતિધરયુગલાચ્ચન્દ્રસૂર્યાવતંસાત્
    મીમાંસાશાસ્ત્રયુગ્મશ્રમવિમલમના મૃગ્યતાં માદૃશોઽન્યઃ ॥ ૨॥

ન વયં કવયસ્તુ કેવલં ન વયં કેવલતન્ત્રપારગાઃ ।
અપિ તુ પ્રતિવાદિવારણપ્રકટાટોપવિપાટનક્ષમાઃ ॥ ૩॥

વન્દે ગોવિન્દતાતૌ મુનિમથ મનવૈ લક્ષ્મણાર્યં મહાન્તં
    ધ્યાયેયં યામુનાર્યં મમ હૃદિ તનવૈ  રામમેવાભિયાયામ્ ।
પદ્માક્ષં પ્રેક્ષિષીય પ્રથમમપિ મુનિં નાથમીડે શઠારિં
    સ્તૌમિ પ્રેક્ષેય લક્ષ્મીં શરણમશરણઃ શ્રીધરં સંશ્રયેયમ્ ॥ ૪॥

સ્વં મેઽહં મે કુતસ્તત્ તદપિ કુત ઇદં વેદમૂલપ્રમાણાત્
    એતચ્ચાનાદિસિદ્ધાદનુભવવિભવાત્ સોઽપિ સાક્રોશ એવ ।
ક્વાક્રોશઃ કસ્ય ગીતાદિષુ મમ વિદિતઃ કોઽત્ર સાક્ષી સુધીઃ સ્યાત્
    હન્ત ત્વત્પક્ષપાતી સ ઇતિ નૃકલહે મૃગ્યમધ્યસ્થવત્ ત્વમ્ ॥ ૫॥

અવિદ્યાતો દેવે પરિવૃઢતયા વા વિદિતયા

સ્વભક્તેર્ભૂમ્ના વા જગતિ ગતિમન્યામવિદુષામ્ ।
ગતિર્ગમ્યશ્ચાસૌ હરિરિતિ જિતન્તાહ્વયમનોઃ
રહસ્યં વ્યાજહ્રે સ ખલુ ભગવાન્ શૌનકમુનિઃ ॥

પુરા સૂત્રૈર્વ્યાસઃ શ્રુતિશતશિરોર્થં ગ્રથિતવાન્
વિવવ્રે તં શ્રાવ્યં વકુલધરતામેત્યં સ પુનઃ ।
ઉભાવેતૌ ગ્રન્થૌ ઘટયિતુમલં યુક્તિભિરસૌ
પુનર્જજ્ઞે રામાવરજ ઇતિ સ બ્રહ્મમુકુરઃ ॥ ૭॥

અર્વાઞ્ચો યત્પદસરસિજદ્વન્દ્વમાશ્રિત્ય પૂર્વે
મૂર્ધ્ના યસ્યાન્વયમુપગતા દેશિકા મુક્તિમાપુઃ ।
સોઽયં રામાનુજમુનિરપિ સ્વીયમુક્તિં કરસ્થાં
યત્સમ્બન્ધાદમનુત કથં વર્ણ્યતે કૂરનાથઃ ॥ ૮॥

દેવાધીશનૃસિંહપાણ્ડવમહાદૂતપ્રવાલપ્રભાન્
શ્રીવૈકુણ્ઠપતિં ત્રિવિક્રમહરિં નીરેશમેઘેશ્વરૌ ।
નીલવ્યોમવિભું મહોરગહરિં જ્યોત્સ્નેન્દુવક્ત્રં હરિં
ચોરેશં કૃતચિન્તભક્તહૃદયાવાસં મુકુન્દાહ્વયમ્ ॥

કામાવાસપતિં નૃકેસરિવરં દીપપ્રકાશપ્રભું
શ્રીયુક્તાષ્ટભુજાસ્પદેશમનઘં શ્રીમદ્યથોક્તક્રિયમ્ ।
ઇત્યષ્ટાદશદિવ્યમઙ્ગલવપુર્દેવાન્ સરોયોગિના સાકં
નિસ્તુલકાઞ્ચ્યભિખ્યનગરીનાથાન્ નમામસ્સદા ॥

શ્રીમદ્ દ્વારવરં મહદ્ધિ બલિપીઠાગ્ર્યં ફણીન્દ્રહૃદં
ગોપીનાં રમણં વરાહવપુષં શ્રીભટ્ટનાથં મુનિમ્ ।
શ્રીમન્તં શઠવૈરિણં કલિરિપું શ્રીભક્તિસારં મુનિં
પૂર્ણં લક્ષ્મણયોગિનં મુનીવરાનાદ્યાનથ દ્વારપૌ ॥

શ્રીમન્મજ્જનમણ્ડપં સરસિજાં હેતીશભોગીશ્વરૌ
રામં નીલમણિં મહાનસવરં તાર્ક્ષ્યં નૃસિંહં પ્રભુમ્ ।
સેનાન્યં કરિભૂધરં તદુપરિ શ્રીપુણ્યકોટ્યાં હરિં
તન્મધ્યે વરદં રમાસહચરં વન્દે તદીયૈર્વૃતમ્ ॥

કાષાયશોભિ કમનીયશિખાનિવેશં
દણ્ડત્રયોજ્જ્વલકરં વિમલોપવીતમ્ ।
ઉદ્યદ્દિનેશનિભમુલ્લસદૂર્ધ્વપુણ્ડ્રં

રૂપં તવાસ્તુ યતિરાજ ! દૃશોર્મમાગ્રે ॥ ૧૧॥

નમઃ પ્રણવશોભિતં નવકષાયખણ્ડામ્બરં
ત્રિદણ્ડપરિમણ્ડિતં ત્રિવિધતત્ત્વનિર્વાહકમ્ ।
દયાઞ્ચિતદૃગઞ્ચલં દલિતવાદિવાગ્વૈભવં
શમાદિગુણસાગરં શરણમેમિ રામાનુજમ્ ॥ ૧૨॥

એતાનિ તાનિ ભુવનત્રયપાવનાનિ
સંસારરોગશકલીકરણૌષધાનિ ।
જિહ્વાતલે મમ લિખાનિ યથા શિલાયાં
રામાનુજેતિ ચતુરાણ્યમૃતાક્ષરાણિ ॥ ૧૩॥

ઇતિ અનેકવિષયમુક્તકશ્લોકાઃ સમાપ્તા ।

Proofread by Aruna Narayanan narayanan.aruna at gmail.com

---

*Anekavishayamuktakashlokah*

pdf was typeset on July 5, 2021

Please send corrections to *sanskrit@cheerful.com*